COMPILED AND CIRCULATED BY PROF. BARNALI BANERJEE,ASSISTANT PROFESSOR, DEPARTMENT OF SANSKRIT, NARAJOLE RAJ COLLEGE

## SUBJECT- KĀVYAPRAKĀŚA

- काव्यप्रकाशकारेण मम्मटेन ध्वनेः भेदद्वयं प्रतिपादितम्।
  १. अविवक्षितवाच्यध्वनिः।
  २. विवक्षितान्यपरवाच्यध्वनिश्चेति।

**अविवक्षितवाच्यध्वनिः** :- प्रथमं तावत् अविवक्षितवाच्यध्वनिः। मम्मटेन उक्तं—

"अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ।"

अविवक्षितवाच्यध्वनौ हि वाच्यार्थः सर्वथा अविवक्षितः एव तिष्ठति। वाच्यार्थः तत्र विद्यमाने सति अनुपयुक्तः अन्वययोग्यो वा न भवति। अतएव एतादृशः ध्वनिः लक्षणामूलध्वनौ परिगण्यते।

अस्यैव लक्षणाविभागस्य आधारेण लक्षणामूलध्वनिः अर्थात् अविवक्षितवाच्यध्वनिः पुनः द्विधा भवति—

अविवक्षितवाच्यध्वनिः
↓
- अर्थान्तरसंक्रमितवाच्यं
- अत्यन्ततिरस्कृतवाच्यं

उक्तं हि ध्वन्यालोककारेण —

"अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्।
अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्॥" इति।

**अर्थान्तरसंक्रमित वाच्य ध्वनिः**— अर्थान्तरसंक्रमितस्य मूले उपादानलक्षणा भवति। अविवक्षितवाच्यध्वनौ वाच्यं क्वचित् अनुपयुज्यमानत्वाद् अर्थान्तरे परिणमितं भवति।

उदाहरणम् — अस्य उदाहरणम् ध्वन्यालोकात् उद्धृतः।

SUBJECT-KĀVYAPRAKĀŚA

"स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि! धीरा भव"॥

अस्मिन् श्लोके रामोऽस्मि (अहं रामः अस्मि) इत्यस्य शब्दस्य वाच्यार्थः अनुपपन्नः भूत्वा व्यङ्ग्ये परिणमितः भवति। अर्थात् अत्र रामशब्देन केवलं संज्ञाधारिणमेव न, अपितु व्यङ्ग्येन युक्तस्य रामस्यापि प्रतीतिं भवति। रामशब्दस्य व्यङ्ग्यार्थः राज्य-निर्वासनपितृमरणादि- नाना रूपेण भवति।

**अत्यन्ततिरस्कृतवाच्यध्वनिः—**

अत्यन्ततिरस्कृतवाच्यस्य मूले लक्षणलक्षणा भवति। अत्र वाच्यं क्वचिद् अनुपपद्यमानतया अत्यन्तं तिरस्कृतं भवति।

उदाहरणम् :—

"उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम्"।

अस्मिन् श्लोके मुख्यार्थः- हे सखे ततः यस्मात् सुजनता प्रथिता तस्मात् ईदृशमेव सदा कुर्वन् वर्षाणां शतंव्यप्य सुखयुक्तं तिष्ठतु, परन्तु श्लोकोऽयं क्वचिद् अपकारिणं प्रति विपरीतलक्षणया उक्तं, तद्यथा- उपकृतम् अपकृतम् सुजनता दुर्जनता, सखे शत्रो सुखितं दुःखितम् इति।

SUBJECT-KAVYAPRAKASH

[विवक्षितान्यपरवाच्यध्वनि:→]

मम्मटेन उक्तं—

"विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः, अन्यपरं व्यङ्ग्यनिष्ठ"।

विवक्षितान्यपरवाच्यध्वनि: अभिधामूला भवति। अत्र वाच्यं विवक्षितं अर्थात् अन्वययोग्यं सत् व्यङ्ग्यपरकं भवति।

ध्वनिरयं द्विप्रकारकं भवति—

विवक्षितान्यपरवाच्यश्चेति

- असंलक्ष्यक्रमव्यंग्यम्
  - रसध्वनि:
- संलक्ष्यक्रमव्यङ्ग्यं
  - वस्तुध्वनि:
  - अलंकारध्वनि:

[असंलक्ष्यक्रमव्यंग्यं]

विवक्षितान्यपरवाच्यध्वनौ: प्रथम: भेद: तावत् असंलक्ष्यक्रमव्यंग्यध्वनि:। अत्र वाच्य व्यङ्ग्ययोर्मध्ये क्रम: सम्यग्रूपेन लक्षित: न भवति। परन्तु अत्र क्रम: अवश्यमेव विद्यते। सम्प्रति प्रश्न: जायते उक्त: क्रम: कथं न लक्ष्यते। मम्मटेन उक्तं — "लाघवात् न लक्ष्यते।"

अस्मिन् प्रकारे अङ्गरूपेण रसादिप्रपञ्च: विद्यते। रस-भाव-रसाभास-भावाभास-भावप्रशम-भावोदय-भावसन्धि-भावशवल-तानाम् उपलक्षणं भवति। रसभावादीनां स्थिति:

SUBJECT-KĀVYAPRAKĀŚA

अङ्गरूपेणापि भवति। परन्तु तदा ते रसाभावादय: अलंकारस्य विषया: भविष्यन्ति। न तु ध्वने:। यदा रसाभावादीनां व्यङ्ग्यता अंगिरूपेण भविष्यति, अपि च विभावादिषु वाच्यसरस्योर्मध्ये विद्यमान: क्रम: लक्षित: न भवति, तदा स: असंलक्ष्यक्रम-ध्वने: विषय: भविष्यति।

**संलक्ष्यक्रमव्यंग्यध्वनि:**

अस्मिन् ध्वनौ: वाच्य-व्यंग्ययो: क्रम: सम्यक् रूपेण उपलक्ष्यते। यथा-घण्टाया: रणनानन्तरं समुद्भूत: अनुरणनध्वनि:

उदाहरणम्:-

"एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती।"

कुमारसम्भवात् उद्धृत: अस्मिन् श्लोके पार्वत्या: लज्जारूपो-व्यभिचारिभाव: व्यंग्य:। अत्र पार्वत्या: कमलपत्रगणना अधोमुखत्वरूप-अनुभावै: लज्जा-रूपस्य भावस्य झटिति न अवगम्यते। परन्तु परमेश्वरं पतिरूपेण प्राप्तुं कृता तपस्या, नारद-कृतविवाहादि प्रसंगज्ञानेन च लज्जार्थ: प्रतीयते; अनेन व्यवधानेन एव अत्र संलक्ष्यक्रमव्यंग्य: अवगम्यते इति भाव:।

---

**अस्मात् प्रश्नानि भविष्यन्ति:-**

१. मम्मटदिशा ध्वनेर्भेद: लेखनीय:।
२. विवक्षितान्यपरवाच्यध्वने: भेद: सोदाहरणं लेखनीय:।
३. 'उपकृतं बहु तत्र किमुच्यते'- अत्र को ध्वनि:? व्याख्या कार्या।